# सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः

# डोहगी, ऊना (हिमाचलप्रदेशः)

भारतसर्वकारस्य शिक्षामन्त्रालयस्य योजनाधीनः,

नवदेहलीस्थ-केन्द्रीयसंस्कृतविश्वविद्यालयेन सम्बद्धः

Website : http://sdasm.in/ Email: asmvdohgi1928@gmail.com

## "78तमः स्वातन्त्र्योत्सवः - 2024"

## प्रतिवेदनम्

परमहुतात्मनां अमरवीराणां प्राणार्पणेन प्राप्तस्य स्वातन्त्र्यस्य कारणात् अद्य वयं भारतीयाः पुनः राष्ट्रस्यास्य परमवैभवस्थितिम् आनेतुं प्रयतमानाः स्म। प्राप्तस्य स्वातन्त्र्यस्य उत्सवत्वेन आचरणार्थं प्रतिवर्षमिव अस्मिन्नपि हायने 15.08.2024 तमे दिवसे अस्मदीये महाविद्यालये त्रिरङ्गध्वजोत्तोलनपूर्वकं स्वातन्त्र्योत्सवः महता वैभवेन समनुष्ठितः इति मोदस्य विषयः। उत्सवोऽयम् आभासीयमाध्यमेन प्रत्यक्षतया च उभयथाऽपि सुसम्पन्नः।

केन्द्रीयसंस्कृतविश्वविद्यालयात् प्राप्तपत्रानुसारं प्रातः 8.00 वादने समेऽपि परिसरसदस्याः आभासीयमाध्यमेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालयेन संयुक्ताः भूत्वा तत्र आचर्यमाणे स्वातन्त्र्योत्सवे साक्षिणः अभूवन्। कार्यक्रमेऽस्मिन् मुख्यातिथीनां तिरुपतितः समागतानां TTD भक्तिवाहिन्याः निर्देशकानाम् डा. डी.पी.अनन्तवर्याणां पूर्वजानां त्याग-आत्माहुत्यादिप्रेरकम् उद्बोधनं ततश्च विशिष्टातिथीनां तिरुपतिस्थराष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलपतीनाम् आचार्याणां जी.एस्.आर्. कृष्णमूर्तिमहाभागानाम् उद्बोधनम् अस्माभिः श्रुतम्। अमीषां मातृसंस्था अयमेव केन्द्रीयसंस्कृतविश्वविद्यालयः। अत्रागत्य कार्यक्रमे भागग्रहणेन ते गौरवानुभूतिम् प्राप्नुवन्।

अन्ते कुलपतीनां स्वनामधन्यानां आचार्याणां श्रीनिवासवरखेडीवर्याणां 'राष्ट्रं धारयतां ध्रुवम्' इत्यादिवेदवाक्यात् वर्तमाने कथमस्माभिः स्वजीवने प्रेरणा प्राप्तव्या इति प्रेरकोद्बोधनेन सर्वेऽपि श्रोतारः प्रेरिताः अभूवन्। कार्यक्रमस्यास्य सुसफलं सञ्चालनम् आचार्याः मधुकेश्वरभट्टाः अकुर्वन्। ततःपरं महाविद्यालये छात्राणां प्रात्यक्षिककार्यक्रमाः समारब्धाः। कार्यक्रमविवरणिका अत्र प्रस्तूयते -

## कार्यक्रमविवरणिका

- कुलगीतम् - वैष्णवी सख्यश्च (महाविद्यालयच्छात्राः)
- सरस्वतीस्तवनम् - अनुराधा सख्यश्च (महाविद्यालयच्छात्राः)
- स्वागतभाषणम् - डा. राजिन्द्रकुमारशर्मा
  (सहाचार्यः, व्याकरणविभागः, स.ध. आदर्शसंस्कृतमहाविद्यालयः)
- भाषणम् - 1. शिवम शर्मा (प्राक्शास्त्रि-प्रथमवर्षम्)
  2. मुस्कान (प्राक्शास्त्रि-प्रथमवर्षम्)
  3. आंचल शर्मा (शास्त्रि-तृतीयवर्षम्)
  4. हेमलता (शास्त्रि-तृतीयवर्षम्)
- देशभक्तिगीतम् - ज्योतिबाला सख्यश्च (महाविद्यालयच्छात्राः)
- समूहनृत्यम् - अक्षिता सोनिया शीतल च (शास्त्रि-द्वितीयवर्षम्)
- भाषणम् - कविता देवी (शास्त्रि-तृतीयवर्षम्)
- नृत्यम् - सोनिया (शास्त्रि-द्वितीयवर्षम्)
- कवितापाठः - पलक शर्मा (शास्त्रि-तृतीयवर्षम्)
- योगासनप्रदर्शनम् - समीरगणः (महाविद्यालयच्छात्राः)
- अध्यक्षीयमुद्बोधनम् - डा. लालसिंहपठानिया
  (प्राचार्यः, सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः, डोहगी)
- धन्यवादसमर्पणम् - डा. मुकेशकुमारः
  (सहायकाचार्यः, ज्योतिषविभागः, स.ध. आदर्शसंस्कृतमहाविद्यालयः)
- सत्रसञ्चालिका - सुश्री सोनिया कुमारी (शास्त्रि-द्वितीयवर्षम्)

# चित्रमालिका






GPS Map Camera
Una,HP,India
Ritt Satrukha Road, Bangana, Una, 174307,
HP, India
Lat 31.622412, Long 76.359489
08/15/2024 12:41 PM GMT+05:30
Note : Captured by GPS Map Camera


डोहगी, ऊना, हिमाचलप्रदेशः
GPS Map Camera
Una,HP,India
Ritt Satrukha Road, Bangana, Una, 174307,
HP, India
Lat 31.622370, Long 76.359484
08/15/2024 12:14 PM GMT+05:30
Note : Captured by GPS Map Camera


S.D. ADARSH SANSKRIT COLLEGE, DOHGI, DISTT. UNA (H.P.)
स्वातन्त्र्योत्सवः -2024
GPS Map Camera
Una,HP,India
Ritt Satrukha Road, Bangana, Una, 174307, HP, India
Lat 31.622399, Long 76.359453
08/15/2024 12:11 PM GMT+05:30
Note : Captured by GPS Map Camera


GPS Map Camera
Una,HP,India
Ritt Satrukha Road, Bangana, Una, 174307, HP, India
Lat 31.622310, Long 76.359536
08/15/2024 11:22 AM GMT+05:30
Note : Captured by GPS Map Camera







| | | |
|---|---|---|
| डा. राजिन्द्रकुमारशर्मा | डा. मुकेशकुमारः | डा. लालसिंहपठानिया |
| (कार्यक्रमसंयोजकः) | (कार्यक्रमसमन्वयकः) | (प्राचार्यः,प्र.) |